# गुरुवातपुरीश पञ्चरत्नं

नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण ।
नारायण नारायण नारायण नारायण
नारायण नारायण नारायण नारायण ॥

कल्याण रूपाय कलौ जनानां कल्याणदात्रे करुणा सुधाब्धे ।
कम्ब्वादि दिव्यायुध सत्कराय वातालयाधीश नमो नमस्ते ॥ १॥

नारायणेत्यादि जपद्भिरुच्चैः भक्तैः सदापूर्ण महालयाय ।
स्वतीर्थ गाङ्गोपम वारिमग्न निवर्तिताशेष रुजे नमस्ते ॥ २॥

ब्राह्मे मुहूर्ते परितः स्वभक्तैः संदृष्ट सर्वोत्तम विश्वरूप ।
स्वतैल संसेवक रोग हर्त्रे वातालयाधीश नमो नमस्ते ॥ ३॥

बालान् स्वकीयान् तव सन्निधाने दिव्यान्न दानात्परिपालयद्भिः ।
सदा पठद्भिश्च पुराण रत्नं संसेविता यास्तु नमो हरे ते ॥ ४॥

नित्यान्नदात्रे च महीसुरेभ्यः नित्यं दिविस्थै र्निशि पूजिताय ।
मात्रा च पित्रा च तथोद्धवेन सम्पूजिता यास्तु नमो नमस्ते ॥ ५॥

अनन्तरामाख्य महिप्रणीतं स्तोत्रं पठेद्यस्तु नर स्त्रिकालम् ।
वातालयेशस्य कृपाबलेन लभेत सर्वाणि च मङ्गलानि ॥ ६॥

गुरुवातपुरीश पञ्चकाख्यं स्तुतिरत्नं पठतां सुमङ्गलं स्यात्।
हृदि चापि विशेत् हरिः स्वयं तु रतिनाथायुत तुल्य देहकान्तिः ॥ ७॥